# Hayagriva Dandakam

# હયગ્રીવદણ્ડકમ્

## Document Information

Text title : Hayagriva Dandakam

File name : hayagrIvadaNDakam.itx

Category : vishhnu, daNDaka

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# હયગ્રીવદણ્ડકમ્

જય જય તુરઙ્ગાસ્ય નસ્તો મુખાન્નિઃસૃતાનન્તવેદાદિવિદ્યાપ્રબોધીકૃતામ્ભોજસમ્ભૂત હેષારવોન્નિર્જિતાશેષદૈતેય લક્ષ્મ્યામૃતેનાનિશં સિચ્યમાનાઙ્ગ રાકેન્દુકોટિપ્રતીકાશ દેહપ્રભાભાસિતાબ્જાત ગર્ભાણ્ડવાહ્યાન્તરાનમ્રધાત્રીરરુદ્રેન્દ્ર મુખ્યા મરવ્રાતકો-

ટીરમાણિક્યકાન્તિચ્છટારઞ્જિતાઙ્ઘ્રે શરચ્ચન્દ્રહૃન્મન્દિરધ્વાન્તરાશે પ્રપન્નામરાનોકહસ્ત્વં પુરા દેવ નારાયણાખ્યેન રૂપેણ લોકં સ્વગર્ભે નિધાય શ્રિયો બાહુયુગ્માન્તરે સંસ્થિતઃ સન્ સિસૃક્ષુસ્ત્વમાદૌ વિધાતારમાસૃજ્ય તત્સત્રયાગે હયગ્રીવરૂપં

સમાસ્થાય દૈત્યાધમૌ લોકશત્રૂ મધૂકૈટભાખ્યૌ ચ ચક્રેણ હત્વા પુનર્લોકઃસંરક્ષણાર્થં ઝષાદ્યાવતારૈર્મહાદૈત્યસઙ્ઘાન્ વિનિર્મથ્ય લોકાન્ સદા પાસિ ભો દેવ યસ્ત્વાં મનુષ્યોત્તમો દુગ્ધપાથોધિમધ્યસ્થસુશ્વેતનામોલ્લસદ્વીપમધ્યે સુસન્તાનવૃક્ષાવલી વેષ્ટિતે સન્મણિસ્તમ્ભયુક્તે મહામણ્ડપે તત્ર પરહે કર્ણિકાયાં સુવાસૂતિબિમ્બે મહાયોગપીઠે નિષણ્ણં નમદ્દેવતામૌલિમન્દારમાલાસ્રવન્માકરન્દદ્રવક્ષાલિતેનાઙ્કુશચ્છ-ત્રપાઠીનવજ્રામ્બુજાતોર્ધ્વરેખાઙ્કિતેનાઙ્ઘ્રિયુગ્મેન સંરાજિતં શ્વેતકર્મા- ભગુલ્ફં લસજ્જાનુયુગ્મં દિશાદન્તિશુણ્ડોપમોરુદ્વયં દુગ્ધસિન્ધ્વન્તરીયોપમેનાચ્છકૌશેયવસ્ત્રાભિરામેણ ભાસ્વ-

નિતમ્બેન યુક્તં વિયદ્વાહિની વર્તુલાવૃત્તગમ્ભીરનાભીસરસ્તીરસઞ્જાતરોમાવલીમણ્ડિતે-

નોદરેણાઞ્ચિતં શ્રીનિવાસાયિતોરસ્તલં શેષભોગાભહસ્તૈશ્ચતુર્ભિઃ સદા શઙ્ખમુક્તાક્ષમાલાલસત્પુસ્તકોદ્બોધયુક્તારવિન્દાનિ સમ્યગ્દધાનં રણદ્ભૃઙ્ગસંસક્તસમ્ફુલ્લમન્દારમાલાવલીલગ્નસત્કણ્ઠશોભાભિરામં શશાઙ્કાંશુસઙ્કાશસત્કેશરવ્રાતકેશાવલીમણિ દન્તકાન્તિચ્છટાભાસિતાશાવકાશં દલત્પદ્મપત્રાયતાક્ષં સ્ફુરદ્દક્ષિણાવર્તશઙ્ખપ્રતીકાશકર્ણં લસન્મસ્તકં દિવ્યમુક્તામયોદારકોટીરકેયૂરહારાવલીમેખલાદ્યાખિલૈર્ભૂષણૈ-

ર્ભૂષિતં ચન્દ્રનાચર્ચિતાશેષગાત્રં સદા મૂર્તિમદ્વેદશાસ્ત્રેતિહાસાદિવિદ્યાવલીસેવિતં

શ્રીસતીચઞ્ચલાપાઙ્ગનીરાજિત બ્રહ્મરુદ્રાદિવન્દ્યં સન્મનઃ પઙ્કજે ચિન્તયન્ દેવ બાહ્યે હરિદ્રોમયાલિપ્તકે રઙ્ગવલ્લીસુશોભાઞ્ચિતે સ્થણ્ડિલે શ્વેતકૌશેયવસ્ત્રાવૃતે માલતીમલ્લિ-

કાદિપ્રસૂનાવલીમણ્ડિતે ચક્રપદ્માદિસન્મણ્ડલોપેતપીઠે યથા યાજ્ઞિકા બાહ્યવહ્નૌ નિજાન્તઃસ્થમગ્નિં સમાકૃષ્ય મન્ત્રાક્ષતૈઃ સ્થાપયિત્વાર્ચયન્તિ સ્મ તદ્વદ્બહિર્યોગમાર્ગેણ

હૃત્પદ્મમધ્યસ્થમીશં સ્વબિમ્બે પ્રતિષ્ઠાપ્ય નિત્યં ત્વદંષ્ટાક્ષરેણોક્તમાર્ગેણ સમ્પૂજયન્ વર્તતે દેવ યદ્વા સુવર્ણાદિસાણલોહપત્રેષુ વા ભૂર્જપત્રેષુ વા પટ્ટવસ્ત્રેઽથવા વહ્નિપૂર્વાણદિગ્રાજદન્તારકેષુ ક્રમાદેકવર્ણં ત્વદીયં લિખિત્વાથ પઞ્ચાક્ષરં ગારુડં ચાષ્ટવર્ણં સ્વરાનુષ્ટુમં

ઇમં સમ્યગાલિખ્ય તદ્બહિર્બીજમાર્ગેષ્વનઙ્ગાક્ષૈરૈઃ કાદિસાન્તૈઃ ક્રમાદ્વેષ્ટયિત્વા તતો વ્યોમયુગ્મં ધરામણ્ડલે દિક્પતીનાં ચ બીજાનિ સંલિખ્ય ત્વદ્બિમ્બવદ્ગન્ધપુષ્પોપહારાદિભિર્ભક્તિભાવેન સમ્પૂજ્ય સન્મન્ત્રસિદ્ધો ભવેત્ તસ્ય વક્ત્રે સ્થિરા શારદા તસ્ય ગેહે ધ્રુવા શ્રીઃ સ્વયં તસ્ય દાસા નૃપાલાદયસ્તસ્ય ભક્તિર્ભવેચ્છાશ્વતી તસ્ય વિદ્યા સ્ફુરત્યશ્રુતપ્રજ્ઞયા તસ્ય પુત્રાભિવૃદ્ધિર્ભવેત્ તસ્ય વાઞ્છા

લભન્તેઽખિલા દેવ યદ્વા મનોર્જઞ્જપૂકો ભ્રુવોરન્તરે ત્વાં સમસ્તાગમાનુદ્ગિરન્તં સમાચિન્ત્ય તત્રૈવ દીર્ઘાન્વિતં બિન્દુયુક્તં ચતુર્થોષ્મરૂપં મનું સ્વાન્વિતં સમ્યગુચ્ચાર્ય સાયમ્મુખે મુક્તનામાસને સન્નિવેશ્યાનિલં ચેડયા પૂરયન્ કેવલે કુમ્ભકે સંસ્થિતઃ

સન્ તતોર્ધ્વીકૃતેન સ્વજિહ્વાગ્રભાગેન રન્ધ્રં નિરુધ્યોદ્ધતં સોમનીરં પિબેત્ પ્રત્યહં તસ્ય ગીર્વાણવાણી વશા તસ્ય પાતઞ્જલં સ્યાજ્જલં તસ્ય ભાટ્ટં ઘરટ્ટોત્થપિષ્ટોપમં તસ્ય તર્કસ્તુ પાણિસ્થકર્કન્ધુકા તસ્ય વૈયાસિકી ગીર્મરુન્મેચિકા સૈષ વાદેષુ પઞ્ચાનનો દેવ યો વા ઘૃતં બ્રાહ્મિકાપાચિતં વાથ વા કઙ્ગુલીબીજજાલાનિ વાચાભિમન્વ્ય

ત્વદીયેન મન્ત્રેણ નિત્યં પિબેત્ ખાતયેત્ તસ્ય વક્ત્રે કવિત્વં સુધાસમ્મિતં સમ્ભવેત્ તસ્ય બુદ્ધિર્બહુગ્રન્થસન્ધારિણી સ્યાત્ પ્રભો દેવ યત્તે પદામ્ભોજશૌચોદકં શૂલપાણેઃ શિરોભૂષણં યસ્ય નાભ્યુદ્ભવો લોકનિર્માણકૃત્ પદ્મભૂર્યસ્ય પૌત્રો હરઃ સર્વસંહારકૃદ્

યસ્ય નિઃશ્વાસરૂપાઃ સમસ્તાગમા યસ્ય પત્નીકટાક્ષસ્ય લેશો વિધીશેન્દ્રમુખ્યામરસ્થાનદો યસ્ય તલ્પં સશૈલાટવીસિન્ધુવિશ્વમ્ભરાધારકઃ શેષભોગીશ્વરો યસ્ય

વાહોત્તમઃ સર્વવેદાભિમાની ખગાધીશ્વરો યસ્ય વક્ત્રાગ્નિમધ્યે સુરારાતિસઙ્ઘાઃ પતઙ્ગા બભૂવુઃ સ્વયં યસ્ય દિવ્યો હયો ભક્તિભાજાં નૃણાં તીર્થકોટ્યુત્થપુણ્યાધિકો યસ્ય

વિજ્ઞાનભક્ત્યાખ્યસદ્દ્રવ્યસમ્પાદકાનાં ભવેદક્ષયાનન્દભોગઃ પ્રભો દેવ તં ત્વામહં સચ્ચિદાનન્દમૂર્તિ જગજ્જન્મસંરક્ષણજ્ઞાનસંહારબન્ધાદિહેતું નિરસ્તાધિકં નિઃસમં

સદ્ગુણામ્ભોનિધિં નિત્યમુક્તં નિજાનન્દતૃપ્તં વિભું નિર્ગતાશેષદોષં નિરીશં સ્વરોમાવલીકૂપસંસ્થાબ્જગર્ભાણ્ડકોટિવ્રજં મુક્તવાગીશભોગીશપક્ષીશ દેવેશકઃ દર્પસૂર્યાદિ-

મુખ્યામરૈઃ સેવિતં શ્રીકરામ્ભોજરત્નોર્મિકાદીધિતિસ્તોમશોણીકૃતાઙ્ઘ્રિદ્વયં ભક્ત-

લોકાર્જિતાનેકજન્માઘશુષ્કાટવીપાવકં સર્વવેદૈકવેદ્યં સર્વદેવૈકવન્દ્યં મહાયોગિહૃન્મન્દિરં સન્તતાનન્તભોગાસનં દેવદેવં પ્રણમ્ય પ્રભો યાચયે સાધુનિન્દાત્મશંસાશ્રુત-

ગ્રન્થવેત્તૃત્વદુઃશાસ્ત્રવેત્તૃત્વદુષ્ટાન્નભોક્તૃત્વદુષ્ટાત્મસેવાદ્યનન્તાપરાધાલયં નિત્યકર્માદ્યનુષ્ઠાનદૂરં દુરાચારિણં જ્ઞાનહીનં સદા ક્રોધલોભાદ્યમિત્રાન્વિતં સ્વોત્તમાચાર્યસેવાનભિજ્ઞં કૃતઘ્નં નૃશંસં મહાઘૌઘસિન્ધૌ નિમગ્નં કૃપામ્ભોનિધે પાહિ નિશ્ચઞ્ચલાં

તે પદામ્ભોજયુગ્મે ચ ભક્તિં પ્રભો દેહિ સુજ્ઞાનવન્તં કુરુષ્વાશુ યત્તે મનોજ્ઞં લસત્પુણ્ડરીકાયતાક્ષં પ્રસન્નાનનં ચારુમન્દસ્મિતં શોભનાઙ્ગં શશાઙ્કપ્રભં દિવ્યસદ્ગન્ધભૂષામ્બરાલઙ્કૃતં શ્રીસખં સચ્ચિદાનન્દરૂપં સદા મન્મનઃપઙ્કજે તે સ્થિરં સ્થાપયાનન્તશક્તે ।

જય વાજિવક્ત્ર પ્રભો જય સિન્ધુકન્યાપતે જય દેવચૂડામણે જયાનન્તમૂર્તે જયાનન્દ સિન્ધો જયાગાધબોધ પ્રભો શ્રીરમાનાથ લોકૈકનાથાપ્રમેયાચ્યુતાનન્ત ગોવિન્દ તુભ્યં નમસ્તે નમસ્તે નમઃ પાહિ માં પાહિ ।

ઇતિ શ્રીહયગ્રીવદણ્ડકં સમ્પૂર્ણમ્ ।

સ્તોત્રસમુચ્ચયઃ ૨ (૭૭)

Proofread by Rajesh Thyagarajan

*Hayagriva Dandakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*